॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५१

तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः ।
देशकालहितं वाक्यं भ्रातुरुत्तममब्रवीत् ॥१॥

सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ।
अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥२॥

कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ।
तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥३॥

ततः पश्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् ।
समित्रा ज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥४॥

आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ।
लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥५॥

तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः ।
वेष्टन्ते तस्य लाङ्गूलं जीर्णैः कार्पासिकैः पटैः ॥६॥

संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ।
शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः ॥७॥

तैलेन परिषिच्याथ तेऽग्निं तत्रावपातयन् ॥८॥

लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् ।
रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥९॥

स भूयः सङ्गतैः क्रूरै राकसैर्हरिसत्तमः ।
निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥१०॥

कामं खलु न मे शक्ता निबधस्यापि राक्षसाः ।
छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥११॥

सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ।
किं तु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥१२॥

लङ्का चरयितव्या मे पुनरेव भवेदिति ।
रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ।
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥१३॥

कामं बन्धैश्च मे भूयः पुच्छस्योद्दीपनेन च ।
पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥१४॥

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ।
परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥१५॥

शङ्खभेरीनिनादैस्तैर्घोषयन्तः स्वकर्मभिः ।
राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥१६॥

हनुमांश्चारयामास राक्षसानां महापुरीम् ।
अथापश्यद्विमानानि विचित्राणि महाकपिः ॥१७॥

संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् ।
रथ्याश्च गृहसम्बाधाः कपिः शृङ्गाटकानि च ॥१८॥

चत्वरेषु चतुष्केषु राजमार्गे तथैव च ।
घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ॥१९॥

दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः ।
राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥२०॥

यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः ।
लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ॥२१॥

श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ।
वैदेही शोकसन्तप्ता हुताशनमुपागमत् ॥२२॥

मङ्गलाभिमुखी तस्य सा तदासीन्महाकपेः ।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥२३॥

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ।
यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥२४॥

यदि कश्चिदनुक्रोशस्तस्य मय्यस्ति धीमतः ।
यदि वा भाग्यशेषं मे शीतो भव हनूमतः ॥२५॥

यदि मां वृत्तसम्पन्नां तत्समागमलालसाम् ।

स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ २६ ॥

यदि मां तारयत्यार्यः सुग्रीवः सत्यसङ्गरः ।
अस्माद्दुःखान्महाबाहुः शीतो भव हनूमतः ॥ २७ ॥

ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः ।
जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ॥ २८ ॥

दह्यमाने च लाङ्गूले चिन्तयामास वानरः ।
प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ २९ ॥

दृश्यते च महाज्वालः करोति च न मे रुजम् ।
शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः ॥ ३० ॥

अथ वा तदिदं व्यक्तं यद्दृष्टं प्लवता मया ।
रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ३१ ॥

यदि तावत्समुद्रस्य मैनाकस्य च धीमथ ।
रामार्थं सम्भ्रमस्तादृङ्मिमग्निर्न करिष्यति ॥ ३२ ॥

सीतायाश्चानृशंस्येन तेजसा राघवस्य च ।
पितुश्च मम सख्येन न मां दहति पावकः ॥ ३३ ॥

भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ।
उत्पपाताथ वेगेन ननाद च महाकपिः ॥ ३४ ॥

पुरद्वारं ततः श्रीमाञ्शैलशृङ्गमिवोन्नतम् ।
विभक्तरक्षःसम्बाधमाससादानिलात्मजः ॥ ३५ ॥

स भूत्वा शैलसङ्काशः क्षणेन पुनरात्मवान् ।
ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ॥ ३६ ॥

विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसंनिभः ।
वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ॥ ३७ ॥

स तं गृह्य महाबाहुः कालायसपरिष्कृतम् ।
रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥ ३८ ॥

स तान्निहत्वा रणचण्डविक्रमः
समीक्षमाणः पुनरेव लङ्काम् ।
प्रदीप्तलाङ्गूलकृतार्चिमाली
प्रकाशतादित्य इवांशुमाली ॥ ३९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com